दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लषष्ठी
ज्येष्ठ 08 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-209 | 1 | मई 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुख्यमन्त्रिणः सुक्खु महोदयस्य घोषणाः २०३० पर्यन्तं हिमाचलप्रदेशे हरित-आवरणं ३२ प्रतिशतं कर्तुं लक्ष्यम्

3 HP CABINET MEETING - सीबीएसई-विद्यालयेषु शिक्षकाणां नूतनपदानां पूरणसहितं एतेषु निर्णयेषु भवितुं शक्नोति अनुमोदनम्

4 षोडश-असम-विधानसभायाः अधिवेशने १७ संख्यकानां विधायकानां संस्कृतभाषया शपथग्रहणं सम्पन्नम्

## स्वास्थ्य-सेवा-महानिदेशालयेन इबोला-संक्रमणेन प्रभावितानां यात्रिणां कृते कश्चन विशेष-स्वास्थ्य परामर्शः प्रसारितः



**हिमसंस्कृतवार्ता।** स्वास्थ्य-सेवा-महानिदेशालयेन इबोला-संक्रमणेन प्रभावितेभ्यः देशेभ्यः आगम्यमानानां अथवा तन्मार्गेण गच्छतां यात्रिणां कृते कश्चन विशेष-स्वास्थ्य परामर्शः प्रसारितः। स्वास्थ्य-परामर्शानुसारं ये यात्रिणः काङ्गो-प्रजातान्त्रिक गणराज्यं, युगाण्डा, तथा दक्षिण-सूडान-सदृशेषु उच्च-संकट-युक्तेषु देशेषु भ्रमणं कृतवन्तः, तथा च येषु ज्वरः, शिरोवेदना, पीडा, अनिर्धारित-रक्तस्रावः वमनञ्चेत्यादीनि लक्षणानि दृश्यन्ते, ते सद्य एव चिकित्सकीय-सहायतां प्राप्तुं साग्रहं सूचिताः सन्ति। महानिदेशालयेन यात्रिणः अपि सचेतिताः यत्, ये केऽपि शङ्कितस्य अथवा पुष्टि-कृतस्य इबोला- संक्रमितस्य रक्तेन शरीर-द्रवेण वा सह प्रत्यक्ष-सम्पर्क स्थापितवन्तः, तैः प्रवास-निर्गमन-प्रक्रियायाः पूर्वमेव विमानपत्तन-स्वास्थ्य-अधिकारिणे अथवा स्वास्थ्य-पटलस्य पुरतः अनिवार्यरूपेण विवरणं प्रदातव्यम्।

## तमिलनाडु-राज्ये जोसेफ-विजयस्य नेतृत्वे शासनेन स्वमन्त्रिसभायाः विस्तारः कृतः

हिमसंस्कृतवार्ता। तमिलनाडु-राज्ये जोसेफ-विजयस्य नेतृत्वे शासनेन स्वमन्त्रिसभायाः विस्तारः कृतः, येन राज्ये संयुक्त-मन्त्रिसभायाः निर्माणस्य मार्गः प्रशस्तः । काङ्ग्रेस्-दलस्य द्वाभ्यां सह त्रयोविंशतिः नूतन-मन्त्रिणः मन्त्रिमण्डले समाविष्टाः। अनेन नूतनेन विस्तारेण मन्त्रिमण्डलस्य संख्या द्वात्रिंशत् यावत् वर्धिता, यस्मिन् मुख्यमन्त्री सी. जोसेफ विजयः अपि अन्तर्भवति। काङ्ग्रेस्-दलम् अधुना प्रायः षट्-दशकानाम् अनन्तरं राज्य-मन्त्रिसभां प्रति प्रत्यागतः अस्ति। सप्तषष्ट्यधिक-नवदश-शततम-वर्षात् परं प्रथमवारम् एतत् राष्ट्रिय दलम् तमिलनाडु-राज्यस्य मन्त्रिमण्डले प्रतिनिधित्वं प्राप्नोति। नव-विस्तारित-मन्त्रिसभायां चतस्रः महिला-मन्त्रिणः अपि सन्ति ।

## भारत-इटली-देशौ भारत-मध्यपूर्व-यूरोप-आर्थिक-वीथेः उत्तरोत्तर-विकासार्थं परस्परं सहमतिं प्रकटितवन्तौ

हिमसंस्कृतवार्ता। भारत-इटली-देशौ व्यापार-निवेश-आपूर्तिशृङ्खलां सुदृढीकर्तुं भारत-मध्यपूर्व-यूरोप-आर्थिक-वीथेः उत्तरोत्तर-विकासार्थं परस्परं सहमतिं प्रकटितवन्तौ । एकस्मिन् संयुक्त-वक्तव्ये, भारतस्य प्रधानमन्त्री नरेन्द्रमोदी तथा च तस्य इटली-समकक्षीया जॉर्जिया-मेलोनी इत्येतौ भारत-मध्यपूर्व-यूरोप-आर्थिक-कॉरिडोर इत्यत्र सहकार्याय स्वकीय-प्रतिबद्धतां ज्ञापितवन्तौ। अस्याः परियोजनायाः भूरिशः प्रशंसां कुर्वन्तौ उभौ नेतारौ, ऐषमः षड्विंशत्यधिक-द्विसहस्रतमे अस्य उपक्रमस्य प्रगतये आईमेक-मन्त्रिस्तरीय-गोष्ठ्याः प्रथमायोजने दृढ-पदक्षेपं स्वीकर्तुं प्रोत्साहितवन्तौ । रोम-नगरे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह आयोजिते संयुक्त-संवाददातृ-सम्मेलने इटली-देशस्य प्रधानमन्त्री जॉर्जिया-मेलोनी आईमेक इत्येतं यूरोप-मध्यपूर्व-भारतदेशान् संयोजयितुं कश्चन महान् आर्थिक-सम्पर्क-मार्गः वर्तते इति वर्णितवती ।



तया प्रोक्तं यदस्मिन् व्यापार-निवेश-आपूर्तिशृङ्खला स्थैर्यं दृढीकर्तुं महत् सामर्थ्यं वर्तते। मेलोनी इत्येषा अवोचत् यत्, क्षेत्रीयान्तर-सम्पर्कस्य सुदृढीकरणं सर्वोपरि-प्राथमिकता अस्ति, तथा च उभावपि देशौ अस्य वीथि-मार्गस्य विकासं दृढतया समर्थयतः। उभावपि प्रधानमन्त्रिणौ पुनरपि प्रोक्तवन्तौ यत्, नवोन्मेषः, विज्ञानं, प्रौद्योगिकी च भारत-इटली-देशयोः मूलाधाराः सन्ति। अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत्, इटली-देशः स्वस्य विशिष्टाभिकल्पनायै सूक्ष्मता-कौशलाय च विश्व-विश्रुतोऽस्ति, अपरत्र भारतस्य ख्यातिः विशालतायै, प्रतिभायै, सुलभ-नवोन्मेषाय च वर्तते।

## केरल विधानसभायाः नवगठितस्य प्रथम-सम्मेलनस्य आरम्भः तिरुवनन्तपुरम्-नगरे अभवत्



**हिमसंस्कृतवार्ता।** केरल विधानसभायाः नवगठितस्य प्रथम-सम्मेलनस्य आरम्भः तिरुवनन्तपुरम्-नगरे अभवत्। जी. सुधाकरन् इत्येषः नवनिर्वाचितान् सदस्यान् शपथं प्रदत्तवान्। अध्यक्ष-पदस्य निर्वाचनं अद्य भविष्यति। सत्तारूढेन यू. डी. एफ्. इत्यनेन तिरुवञ्चूर् राधाकृष्णन् इत्येषः तस्मै पदाय नामाङ्कितः। विधानसभायां भाजपा-दलस्य त्रयः सदस्याः सन्ति, अतः स्पर्धात्मक-निर्वाचनस्य अपेक्षा वर्तते। बी. गोपकुमारः तस्य दलस्य अभ्यर्थिरूपेण घोषितः अस्ति, किन्तु विपक्षः एल्. डि. एफ्. इदानीमपि निर्वाचन-विषये स्वस्य निर्णयं न उद्घाटितवान्।

## पश्चिमबङ्गाल-सर्वकारेण सम्पूर्ण राज्ये सर्वेषु मदरसा इत्येतेषु तत्क्षण-प्रभावेण 'वन्दे मातरम्' इत्यस्य गानम् अनिवार्य कृतम्




**हिमसंस्कृतवार्ता।** पश्चिमबङ्गाल-सर्वकारेण सम्पूर्ण राज्ये सर्वेषु मदरसा इत्येतेषु तत्क्षण-प्रभावेण 'वन्दे मातरम्' इत्यस्य गानम् अनिवार्य कृतम्। अयं आदेशः मदरसा शिक्षा-निदेशालयेन प्रसारितः। अधिसूचनायाः अनुसारं एषः निर्देशः सर्वकारीय-प्रारूप-मदरसा इत्यतेषु सर्वकारीय-अनुदान-प्राप्त-मदरसा इत्यतेषु, मान्यताप्राप्त-मदरसा इत्यतेषु, तथा च अल्पसङ्ख्यक-कार्यमन्त्रालयस्य एवं मदरसा-शिक्षा-विभागस्य अन्तर्गतं कार्यरतासु अनुमोदितासु शिशु-शिक्षा-केन्द्रेषु माध्यमिक-शिक्षा-केन्द्रेषु च प्रवर्तिष्यते।

## सुभाषितम्

**वृतं यत्नेन संरक्षेत्,**
**वित्तमायाति याति च।**
**अक्षीणो वित्ततः क्षीणो,**
**वृततस्तु हतो हतः॥**

हमें अपने शील और चरित्र की यत्नपूर्वक रक्षा करनी चाहिए क्योंकि धन संपत्ति आती जाती और घटती बढती रहती है, परन्तु यदि ऐसा किसी व्यक्ति के शील व चरित्र के साथ हो तो वह एक मृत व्यक्ति के समान है।




## रक्षामन्त्री राजनाथसिंहः तथा दक्षिणकोरिया-देशस्य भूतपूर्वसैनिक कार्य-मन्त्री क्वोन-ओह-योल च भारतीय-युद्ध-स्मारकस्य संयुक्तरूपेण उद्घाटनम् अकुरुताम्

हिमसंस्कृतवार्ता। रक्षामन्त्री राजनाथसिंहः तथा दक्षिणकोरिया-देशस्य देशभक्ति-भूतपूर्वसैनिक कार्य-मन्त्री क्वोन-ओह-योल च सियोल-नगरस्य इमजिंगक-उद्याने भारतीय-युद्ध-स्मारकस्य संयुक्तरूपेण उद्घाटनम् अकुरुताम्। कोरियन्-युद्धस्य पञ्चसप्ततितमस्य वार्षिकोत्सवस्य स्मरणार्थम् आयोजितेषु कार्यक्रमेषु भागरूपेण निर्मितम् एतत् स्मारकं युद्धकाले भारतीय-सेनायाः, भारतस्य संरक्षण-बलस्य तथा च षष्टि-वायुसैनिक-क्षेत्रीय-चिकित्सालयस्य साहसस्य, त्यागस्य, मानवीय-सेवायाश्च सम्मानरूपेण वर्तते।

# मुख्यमन्त्रिणः सुक्खु महोदयस्य घोषणा: २०३० पर्यन्तं हिमाचलप्रदेशे हरित- आवरणं ३२ प्रतिशतं कर्तुं लक्ष्यम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य हरित-आवरणे (हरितिमायां) वृद्धेः दृष्ट्या प्रदेशसर्वकारेण महत्त्वाकांक्षी 'मिशन ३२ प्रतिशतम्' इत्याख्यं अभियानं प्रारब्धम्। अस्य अभियानस्य उद्देश्यं वर्षं २०३० पर्यन्तं हिमाचलप्रदेशस्य हरित-आवरणं ३२ प्रतिशतं यावत् वर्धयितुम् अस्ति। मुख्यमन्त्रिणः सुखविंद्र सिंह सुक्खू महोदयस्य प्रेरणानुसारं वनविभागेन राज्यस्य पारिस्थितिकीतन्त्रं सुदृढं कर्तुम् एका व्यापिका रणनीतिः विरच्य कार्याणि क्रियन्ते। सर्वकारस्य बहुआयामी- नीतीनां प्रभावीरूपेण क्रियान्वयनार्थं तथा च निर्धारितलक्ष्याणां प्राप्त्यर्थं एका समग्रकार्ययोजना सज्जीकृता अस्ति। वर्तमाने राज्यस्य वनक्षेत्रं २९.५ प्रतिशतम् अस्ति, यत् वर्षं २०३० पर्यन्तं वर्धयित्वा ३२ प्रतिशतं कर्तुं लक्ष्यं निर्धारितम् अस्ति। वनक्षेत्रस्य विस्तारेण जैवविविधतायाः संरक्षणे, पारिस्थितिकीय-पुनर्स्थापने, मृत्तिका-जलक्षणयोः संरक्षणे तथा च जलवायुपरिवर्तनस्य दुष्प्रभावाणां न्यूनीकरणे महती सहायता प्राप्स्यते। पर्यावरणसंरक्षणेन सह, अनया पहलेन वनीकरण-कृषिवानिकी-सामुदायिकसहभागितानां माध्यमेन ग्रामीणसमुदायानां कृते सतत- आजीविकायाः अवसराः अपि सृष्टाः भविष्यन्ति। एतेषां लक्ष्याणां प्राप्त्यर्थं कैम्पा, बाह्य- सहायता- प्राप्त-परियोजनानां तथा अन्य- विभागीय- योजनानाम् अंतर्गतं वृक्षारोपणस्य गतिविधयः संचाल्यन्ते। वित्तीयवर्षे २०२६-२७ मध्ये ८,००० हेक्टर परिमिते क्षेत्रे वृक्षारोपणस्य लक्ष्यं निश्चितम् अस्ति, यस्मिन् फलदायिनां तथा च देशीय- प्रजातीनां पादपानां आरोपणे विशेषः बलः दास्यते। मुख्यमन्त्रिणः नेतृत्वे प्रदेशसर्वकारेण कार्यभारग्रहणस्य अनन्तरं पर्यावरणसंरक्षणाय सततविकासस्य संवर्धनाय च बहवः प्रयासाः कृताः। 'राजीव गान्धी वन संवर्धन योजना', 'मुख्यमन्त्री वन विस्तार योजना' तथा 'राजीव गान्धी ग्रीन एडॉप्शन स्कीम' सदृशीनां योजनानां अन्तर्गतं बृहत्स्तरे वृक्षारोपण-अभियानानि संचाल्यन्ते। 'राजीव गान्धी वन संवर्धन योजना' इत्यस्याः अन्तर्गतं वित्तीयवर्षे २०२६-२७ मध्ये प्रायः ४,००० हेक्टरक्षेत्रे १,१०० सामुदायिक-समूहानां माध्यमेन वृक्षारोपणस्य लक्ष्यं निर्धारितम् अस्ति। एतेषु ६० प्रतिशतं महिलासमूहाः, २० प्रतिशतं युवासमूहाः तथा २० प्रतिशतम् अन्ये स्वयं सहायता समूहाः भविष्यन्ति। सुक्खू महोदयः अवदत् यत् पर्यावरणसंरक्षणस्य दिशि राज्यसर्वकारः प्रमुखतया कार्यं करोति तथा च हरितविकास- रणनीतेः मुख्यस्तम्भरूपेण नवीकरणीय- ऊर्जां, प्राकृतिक-कृषिं, प्लास्टिक-अपशिष्ट- प्रबन्धनं तथा सतत-पर्वतीय-विकासं निरन्तरं प्रोत्साहयति। तेन उक्तं यत् एतेषां सामूहिकप्रयासानां बलेन हिमाचलप्रदेशः देशे पारिस्थितिकी-संरक्षणस्य सततविकासस्य च क्षेत्रे एकः अग्रणी राज्यत्वेन उद्भविष्यति।

# प्रत्याशिभिः दातव्यं भविष्यति व्ययस्य विवरणम्, विजेतृभिः पराजितैः च सर्वैः देयं भविष्यति व्ययस्य पूर्णं विवरणम्




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे ५१ नगरीय-निकायेषु सम्पन्नस्य निर्वाचनस्य अनन्तरं अधुना निर्वाचनं स्पर्धायां सम्मिलितैः सर्वैः ११४७ प्रत्याशिभिः स्वकीय- निर्वाचन- व्ययस्य सूचना निर्वाचन-आयोगाय दातव्या भविष्यति। राज्य-निर्वाचन-आयोगेन एकमासाभ्यन्तरे एषा सर्वा सूचना प्रदातुं सर्वान् प्रत्याशिनः आदिष्टाः, कामं ते निर्वाचने विजयिनः अभवन् अथवा पराजिताः, सर्वैः निर्वाचन- व्यय- सम्बद्धा सूचना प्रदातव्या भविष्यति। निर्वाचनकाले नगरनिगमानां प्रत्याशिनां कृते निर्वाचन-आयोगेन अधिकतमः व्ययः एकलक्ष-रूप्यकाणि (१,००,०००) यावत् सीमितः कृतः आसीत्। अपरतः, नगरपरिषदां निर्वाचने ७५ सहस्र रूप्यकाणि तथा नगरपञ्चायतानां निर्वाचने ५० सहस्र रूप्यकाणि यावत् प्रचार-व्ययस्य सीमा निश्चिता आसीत्। राज्ये निर्वाचनपरिणामेषु घोषितेषु सत्सु अधुना सर्वेषां प्रत्याशिनां समीपे २७ दिनानि अवशिष्टानि सन्ति। यद्यपि नगरनिगमानां निर्वाचनपरिणामाः ३१ मई दिनाङ्के आगमिष्यन्ति, अतः नगरनिगमेषु निर्वाचनं सपर्धिभिः सर्वैः प्रत्याशिभिः स्व-व्यय-प्रतिवेदनं ३० जून यावत् दातव्यं भविष्यति, यदा तु अन्य- नगरीय-निकायानां प्रत्याशिभिः १६ जून दिनाङ्कात् पूर्वं स्वकीय- व्यय- प्रतिवेदनं निर्वाचन-आयोगाय समर्पणीयम्। यदि निश्चितसमये कश्चित् प्रत्याशी स्वप्रतिवेदनं न दास्यति, तर्हि तस्मिन् विषये दण्डात्मिका कार्यविधिः भवितुं शक्नोति तथा तस्य प्रत्याशिनः निर्वाचन-प्रतियोगितायां पञ्च-वर्षाणां प्रतिबन्धः भवितुं शक्नोति। इतः पूर्वमपि राज्य-निर्वाचन- आयोगेन २४ नवम्बर, २०२३ तमस्य वर्षस्य आदेशे नगरनिगम-शिमला-निर्वाचनान्तरं व्यय- विवरणम् असमर्पयत्सु प्रत्याशिषु कठोरा कार्यविधिः कृता आसीत्। आयोगस्य निर्देशानुसारं एतादृशाः नव (९) प्रत्याशिनः पञ्चवर्षेभ्यः अयोग्याः घोषिताः आसन्, ये अधुना पञ्चवर्षाणि यावत् निर्वाचनं स्पर्धयितुं न शक्नुवन्ति। अस्मिन् विषये जिला- निर्वाचन- अधिकारिभिः उपायुक्तैश्च अयोग्यानां प्रत्याशिनां सूच्यः जनपदस्य आधिकारिके अन्तर्जालपुटे आरोपिताः कृताः आसन्। विज्ञाप्यतां यत् निर्वाचन-काले आयोगेन व्ययस्य निरीक्षणाय व्ययपर्यवेक्षकाः नियुक्ताः आसन्। अन्वेषणे ज्ञातं यत् केचन प्रत्याशिनः निश्चित-समयावधौ व्यय-विवरणं न समर्पितवन्तः। ततः परं नगर-विकास-विभागस्य निदेशकेन नियमानुसारं कार्यविधिम् कुर्वता ते पञ्चवर्षेभ्यः निर्वाचनस्पर्धायाः अयोग्याः घोषिताः।

# सौन्दर्य प्रसाधनोत्पादस्य

## सूचिकाभेषजत्वेन प्रयोगः सौन्दर्य-चिकित्सालयेभ्यः सर्वथा निषिद्धो वर्तते



**हिमसंस्कृतवार्ता।** सर्वकारेण प्रोक्तं यत् कस्यापि सौन्दर्य प्रसाधनोत्पादस्य सूचिकाभेषजत्वेन प्रयोगः उपभोक्तृभ्यः, विशेषज्ञेभ्यः अथवा सौन्दर्य-चिकित्सालयेभ्यः सर्वथा निषिद्धो वर्तते। केन्द्रीय-औषध-मानक-नियन्त्रण-सङ्गठनेन स्पष्टीकृतं यत्, प्रसाधन सामग्र्यः केवलं मानव-शरीरे घर्षणाय, सेचनाय, प्रोक्षणाय अथवा विकिरणाय एव उद्दिष्टाः सन्ति। सङ्घटनेन प्रोक्तं यत्, विक्रयण-वितरणार्थं प्रसाधनानां निर्माणं तथा च आयात-प्रक्रिया प्रसाधन-नियम-विंशति-प्रतिविंशतिः इत्यस्य प्रावधानैः नियन्त्रिता भवति। सी.डी.एस.सी.ओ. इत्यनेन दृढीकृतं यत्, प्रसाधनोत्पन्नेषु प्रतिबन्धित-तत्वानामुपयोगः, नामपत्रे भ्रामकोक्तिः, संक्रमणोपचारार्थं सौन्दर्य प्रसाधनानां प्रयोगः, तथा च सूचिकाभेषज-माध्यमेन एतेषाम् अनुप्रयोगः औषध-तथा-प्रसाधन-अधिनियम-नियमानाम् गम्भीरं उल्लङ्घनं मन्यते, यस्य कृते दण्डविधानं निश्चितं वर्तते।

# युवाकार्य-खेलमन्त्रालयः सम्पूर्णे देशे राष्ट्रमण्डलक्रीडादिवसस्य सम्पादनार्थं 'फिट् इण्डिया संडेज् ऑन् साइकिल्' इत्यस्य पञ्चसप्ततितमं (75th) महासंस्करणं संविधास्यति



युवाकार्य-खेलमन्त्री डॉ. मनसुख माण्डविया महोदयः मई-मासस्य चतुर्विंशतितमे (24) दिनाङ्के अहमदाबाद-नगरात् एतेषां समारोहाणाम् नेतृत्वं करिष्यति। मन्त्रालयेन प्रोक्तं यत् अस्याः पहल्याः (प्रवृत्तेः) उद्देश्यं २०३० (द्विसहस्रत्रिंशत्) तमे वर्षे आयोज्यमानानां राष्ट्रमण्डलक्रीडानां भारतस्य आतिथ्यं प्रति जनभागितां वर्धयितुम् अस्ति, येन सहैव देशस्य दीर्घकालिकायाः ओलम्पिक-महत्त्वाकाङ्क्षायाः दिशि गतिः प्रदातुं शक्येत। इदं पञ्चसप्ततितमं संस्करणं केवलम् एकं साइकिल-अभियानत्वेन न, अपितु एकस्य राष्ट्रव्यापिनः क्रीडामहोत्सवस्य रूपेण प्रस्तूयते, यः भारतस्य वैश्विकक्रीडाशक्तित्वेन प्रादुर्भावस्य प्रतीकः अस्ति।इदं साइकिल-अभियानं सम्पूर्णे देशे अष्टसहस्रेभ्यः (8000+) अधिकेषु स्थानेषु नागरिकान् एकसूत्रेषु ग्रथिष्यति (एकत्रयिष्यति)। अहमदाबाद-नगरे राष्ट्रमण्डलक्रीडानां मुख्यविषयम् (थीम) आधृत्य एका विशिष्टा प्रदर्शनी अपि उद्घाटयिष्यते।

# मित्रेभ्यः समर्पितः सुक्खु-सर्वकारः रुग्णानां प्रताडने

## स्व-भ्रष्टाचारस्य गोपने च किमपि अवसरं न त्यजति - जयरामठाकुरः



**हिमसंस्कृतवार्ताः - मण्डी।** पूर्वमुख्यमन्त्रिणा प्रतिपक्षनेत्रा च जयरामठाकुरेण वीरवासरे मण्डी-नगरे उक्तं यत्— "मित्रेभ्यः समर्पितः सुक्खु-सर्वकारः रुग्णानां प्रताडने स्वकीय-भ्रष्टाचारस्य प्रच्छादने (गोपने) च किमपि अवसरं न त्यजति। सत्ता-ग्रहणात् आरभ्य एव मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः रुग्णानां कोशात् धनं लुण्ठित्वा प्रदेशस्य अर्थव्यवस्थां सुदृढीकर्तुं इच्छति, यत् अतीव लज्जास्पदं वर्तते।" तथापि तेन सर्वकारस्य दोषपूर्ण-जनविरोधी-निर्णयेषु स्थगनं प्रदातुं माननीय-न्यायपालिकायाः निर्णयानां स्वागतं कृतम्। प्रतिपक्षनेत्रा 'आईजीएमसी' (IGMC) चिकित्सालये रुग्णानां भोजन-शुल्के कृतां महतीं वृद्धिं लक्ष्यीकृत्य कथितं यत् चिकित्सालये उपचाराय आगच्छतां निर्धनानां रुग्णानां भोजनशुल्कं साक्षात् १४ रूप्यकेभ्यः वर्धयित्वा ५० रूप्यकाणि कृतम् अस्ति, दुग्धस्य मात्रा च न्यूनीकृत्य केवलं अर्ध-चषकं (आधा गिलास) विहिता। तेन प्रतिपादितं यत् भोजनशालां (मैस) प्रसंविदाधारेण (ठेके पर) प्रदास्यतः निर्णयात् किन्नौर-चम्बा-सिरमौर-कुल्लू-मण्डी-सदृशानां सुदूर-क्षेत्राणां निर्धन-परिवाराणाम् आयव्ययकं (बजट) विकृतं भविष्यति।

### भ्रष्टाचारं गोपितुं मुख्यमन्त्रिणः

### अन्यः एकः महान् प्रयासः विफलः

जयरामठाकुरेण उक्तं यत् भ्रष्टाचारं प्रच्छादितुम् मुख्यमन्त्रिणः अन्यः एकः सुमहत् प्रयासः विफलः जातः। हिमाचलप्रदेश-उच्चन्यायालयः (High Court) 'स्टेट विजिलैंस एण्ड एण्टी करप्शन ब्यूरो' इति संस्थां 'सूचनायाः अधिकारः अधिनियम-२००५' (RTI Act) इत्यस्य परिधेः बहिः निष्कासयितुं राज्यसर्वकारस्य १२ मार्च दिनाङ्कस्य अधिसूचनायाम् अन्तरिम-स्थगनादेशं (Interim stay) दत्तवान्। तेन अङ्कितं यत् सुक्खु-सर्वकारः प्रतिदिनं ईदृशान् निर्णयान् स्वीकरोति येषां कोऽपि संविधानात्मकः आधारः न भवति, अत एव न्यायलयेन वारं वारं हस्तक्षेपः करणीयः भवति। वर्षे २०२४ मध्ये पञ्जीकृतान् भ्रष्टाचार-प्रकरणान् दमयितुं 'आरटिएइ' (RTI) नियमस्य उल्लङ्घनं क्रियते स्म।

## नियमान् उपेक्ष्य कार्यं करोति सर्वकारः

जयरामठाकुरेण भ्रष्टाचारस्य आरोपैः एकस्मै अधिकारिणे १ अक्तूबर, २०२५ दिनाङ्के मुख्यसचिव-पदस्य अतिरिक्त-कार्यभारस्य प्रदाने अपि सर्वकारः तीक्ष्णतया आक्षिप्तः। तेन उक्तं यत् 'अखिल भारतीयं एव केन्द्रीय सिविलसेवा' नियमानुसारं कस्यापि संवेदनशील-पदे नियुक्त्याः पूर्वं 'विजिलैंस क्लीयरैंस' (Vigilance clearance) अनिवार्या भवति, परन्तु एषः सर्वकारः नियमान् अतिक्रान्त्वा कार्यं करोति। अस्मिन् विषये उच्चन्यायालयस्य खण्डपीठेन (Bench) संज्ञानं गृहीत्वा राज्यसर्वकारं, केन्द्रसर्वकारं, मुख्यसचिवं च प्रति सूचना-पत्रं (Notice) प्रेष्य उत्तरं याचितम्।

# HP CABINET MEETING -

## सीबीएसई-विद्यालयेषु शिक्षकाणां नूतनपदानां

### पूरणसहितं एतेषु निर्णयेषु भवितुं शक्नोति अनुमोदनम्

हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य अध्यक्षतायां शुक्रवासरे राज्यमन्त्रिमण्डलस्य (Cabinet) उपवेशनं भविष्यति। अस्मिन् उपवेशने सीबीएसई-विद्यालयेषु शिक्षकाणां १५०० नूतनपदानां पूरणस्य निर्णयः भवितुं शक्नोति। उद्यानपालनविभागे (Horticulture Department) विविधश्रेणीनां ३० पदानां पूरणस्यापि स्वीकृतिः मिलितुं शक्नोति। उपवेशने वाहनपञ्जीकरणशुल्कस्य (Vehicle registration fee) वर्धनस्य प्रस्तावः अपि आनीयते। पञ्जीकरणस्य न्यूनातिन्यूनं दरं ८ प्रतिशततः (वाहनमूल्यस्य ८%) वर्धयित्वा १० प्रतिशतं कर्तुं प्रस्तावः अस्ति।उपवेशने 'स्टेट बिल्डिङ्ग कोड' (State Building Code) प्रवर्त्तनविषये अपि चर्चा भविष्यति। सर्वकारः 'नेशनल बिल्डिङ्ग कोड' इत्यस्य स्थाने राज्यस्य भौगोलिकपरिस्थितीनां अनुकूलं स्वकीयम् पृथक् नियमसंहितां (कोड) सज्जं कर्तुम् इच्छति। १३.७९ किलोमीटर दैर्घ्ययुक्तस्य 'तारादेवी-शिमला रज्जुमार्ग (रोपवे) परियोजनायाः' उपरि अपि विमर्शः भविष्यति। एतां परियोजनां प्रारब्धुं सर्वकारः ऋणस्वीकृतेः विषयं निश्चेष्यति। एषा परियोजना शिमला-नगरस्य प्रमुखाणि स्थानानि योजयित्वा यातायातस्य प्रभावं (Traffic congestion) न्यूनीकर्तुं सहायिका भविष्यति। उपवेशने पेट्रोल-डीजल-इन्धनयोः उपभोगं न्यूनीकर्तुं काँश्चित् निर्णयात्मकपदक्षेपान् स्वीकर्तुम् अपि सम्भावना वर्तते।



## हास परिहासम्

पतिः– "पश्य, एकः लेखकः कति सुंदरां वार्तां लिखितवान् यत् पतिम् अपि भाषणस्य अधिकारः अस्ति।"

पत्नी अवदत्– "तेनापि केवलं लिखितमेव, सः वक्तुं न शक्तवान्।"

पतिः

## हास परिहासम्

1.पत्नी पृच्छति– "भवान् जानाति वा, संसारे सर्वस्मात् महत् 'अभिचारकर्मः' (काला जादू) कुत्र भवति?"

पतिः मन्दं हसित्वा अवदत्– "प्रसाधनगृहे (ब्यूटी पार्लर)!"

पत्नी

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता- अन्तर्जाले एका सूचना बहु-प्रसारिता अस्ति।

पञ्चचत्वारिंशदंशात्मके तापे शीतदेशीय-श्वानपालनेन तेषां कष्टं भवति इति कयाचित् चिन्ता प्रकटीकृता।

**नन्दिनी-** सत्यम्, मूकानां पशूनां पीडा अस्माभिः ज्ञातव्या।

द्वितीया वार्ता-उच्च-प्रबन्धन-संस्थानस्य काचित् उत्तीर्णा छात्रा कार्य-निमित्तं देहलीं प्रति गता किन्तु तत्र कार्यालयः एव न प्राप्तः। सा वञ्चिता जाता।

**काव्या-** अहो, वञ्चकानां प्रभावः वर्धते। तृतीया वार्ता- ओडिशा-राज्यस्य कृषकेन बहुमूल्यानां मियाजाकी-आम्रफलानां रक्षणार्थं रात्रौ क्षेत्रे एव शयनं कृतम्।

**नन्दिनी-** चौरभयात् कृषकेन कष्टं सोढम्। अन्तिमा वार्ता- अमेरिकादेशस्य भोजनालये मिष्ट- अपूप-कर्तनार्थं दश-सहस्र-रूप्यकाणां शुल्कं स्वामिना गृहीतम्। एषा वार्ता विस्मयकारिणी अस्ति।

**काव्या-** सर्वं धन-लोभस्य फलम्। अस्तु, पुनर्मिलामः। नमो नमः।



### "लौकिकन्यायकोशः"

### "अन्धकरदीपिकान्यायः"

अन्धस्य हस्ते दीपः स्थापितः चेदपि तस्य अन्धस्य कृते तस्य दीपस्य किमपि प्रयोजनं न भवति। कस्यापि वस्तुनः उपयोगं कर्तुं स्वयं योग्यता नास्ति चेत् तस्य जनस्य कृते तस्य वस्तुनः गुणानां द्वारा किमपि प्रयोजनं न भवति। एतस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

## संस्कृतज्ञानप्रश्नोत्तरी

१. **प्रश्नः:** भारतस्य राजधानी का अस्ति?
**उत्तरम्:** भारतस्य राजधानी नवदेहली अस्ति।

२. **प्रश्नः:** हिमाचलप्रदेशस्य राजधानी का अस्ति?
**उत्तरम्:** हिमाचलप्रदेशस्य राजधानी शिमला अस्ति।

३. **प्रश्नः:** भारतस्य राष्ट्रियपुष्पं किम् अस्ति?
**उत्तरम्:** भारतस्य राष्ट्रियपुष्पम् कमलम् अस्ति।

४. **प्रश्नः:** हिमाचलप्रदेशस्य राजकीयपशुः कः अस्ति?
**उत्तरम्:** हिमाचलप्रदेशस्य राजकीयपशुः हिमचित्रकः

५. **प्रश्नः:** भारतस्य सुदीर्घा नदी का अस्ति?
**उत्तरम्:** भारतस्य सुदीर्घा नदी गङ्गा अस्ति।

६. **प्रश्नः:** हिमाचलप्रदेशस्य राजकीयपुष्पं किमस्ति?
**उत्तरम्:** हिमाचलप्रदेशस्य राजकीयपुष्पं गुलाबी बुरांश (Pink Rhododendron) अस्ति।

७. **प्रश्नः:** भारतस्य प्रथमः राष्ट्रपतिः कः आसीत्?
**उत्तरम्:** भारतस्य प्रथमः राष्ट्रपतिः डॉ. राजेन्द्रप्रसादः आसीत्।

८. **प्रश्नः:** हिमाचलप्रदेशस्य प्रथमः मुख्यमन्त्री कः आसीत्?
**उत्तरम्:** हिमाचलप्रदेशस्य प्रथमः मुख्यमन्त्री डॉ. यशवन्तसिंहपरमारः आसीत्।

९. **प्रश्नः:** भारतस्य राष्ट्रियः खगः (पक्षी) कः अस्ति?
**उत्तरम्:** भारतस्य राष्ट्रियः खगः मयूरः अस्ति।

१०. **प्रश्नः:** हिमाचलप्रदेशे कति जनपदाः (मण्डलानि) सन्ति?
**उत्तरम्:** हिमाचलप्रदेशे द्वादश (१२) जनपदाः सन्ति।

# षोडश-असम-विधानसभायाः अधिवेशने १७ संख्यकानां विधायकानां संस्कृतभाषया शपथग्रहणं सम्पन्नम्

हिमसंसकृतवार्ता:- गुवाहाटी । षोडश- असम-विधानसभायाः अधिवेशने नव- निर्वाचित- विधायकानां मध्ये एकम् उल्लेखनीयं दृश्यं दृष्टम्, यत्र सप्तदश विधायकाः संस्कृतभाषया शपथग्रहणम् अकुर्वन्। एषा घटना राज्यस्य राजनैतिक-सांस्कृतिक-क्षेत्रयोः नूतनां दिशम् उद्घाटयति, तथा च भारतीय- परम्परागत- भाषां प्रति श्रद्धां सम्मानं च प्रकाशयति। शपथग्रहणसमारोहे एतेषां विधायकानां संस्कृतभाषायाः चयनम् अस्याः भाषायाः पुनरुत्थानप्रचारयोः क्षेत्रे सकारात्मकं संकेतं प्रददाति। विशेषतः असमराज्यसदृशे बहुभाषिक- प्रदेशे संस्कृतभाषां प्रति एतादृशी रुचिः छात्राणां मध्ये प्रेरणां जनयिष्यति इति विशेषज्ञैः अभिप्रेतम्।

सांस्कृतिक-मण्डलेऽपि एषः प्रयासः प्रशंसितः। बहूनां विदुषां मते संस्कृतं केवलं प्राचीनभाषा नास्ति, अपि तु सा भारतीय-ज्ञान-संस्कृतेः मूलाधारः अस्ति। अतः राजनैतिक-मञ्चे अस्याः भाषायाः प्रयोगः तस्याः गौरवं पुनः प्रतिष्ठापने सहायकं भविष्यति।

उल्लेखनीयम् अस्ति यत् विगतेषु केषुचित् वर्षेषु देशव्यापि संस्कृतभाषायाः प्रचार-प्रसारार्थं विविधाः उपक्रमाः गृहीताः। अस्मिन् परिप्रेक्ष्ये असम-विधानसभायाः एतेन पदक्षेपेण एकं सकारात्मकम् उदाहरणं स्थापितम्।




**संस्कृतभाषया शपथग्रहणं कृतवन्तः विधायकाः-**

१. विश्वजीत् दैमरी
२. विमल बडा
३. जयन्त मल्ल बरूवा
४. भवेश कलिता
५. पृथ्वीराज राभा
६. डॉ. परमानन्द राजवंशी
७. सञ्जय किशाण
८. डॉ. मृदुलकुमार दत्त
९. अमियकान्ति दास
१०. विजयकुमार गुप्ता
११. नीलिमा देवी
१२. डॉ. मिलन दास
१३. मयूर बरगोहाई
१४. विक्टरकुमार दास
१५. कृष्णकमल ताँती
१६. राजदीप गोवाला
१७. पवित्र राभा

एतेभ्यः सर्वेभ्यः विधायकेभ्यः संस्कृत-भारती उत्तर-असम-प्रान्तपक्षतः प्रेसविवृत्ति-माध्यमेन कृतज्ञताः शुभकामनाः च विज्ञाप्यते।


# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययन-विश्वविद्यालये व्याख्यानकार्यक्रमः सम्पन्नः




**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः।** गतदिने नलबारी-स्थिते कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययन-विश्वविद्यालये संस्कृतसाहित्यविभागस्य सौजन्येन प्राच्यविद्यार्णव-आनन्दरामबरुवामहोदयस्य १७६ तमे जयन्त्युत्सवे उपलक्षणे एकस्य व्याख्यानकार्यक्रमस्य आयोजनम् अभवत्।विश्वविद्यालयस्य संस्कृत-साहित्यविभागस्य छात्राणां मङ्गलाचरणेन आरब्धे अस्मिन् कार्यक्रमे स्वागतभाषणं संस्कृतसाहित्यविभागस्य अध्यक्षः, विश्वविद्यालयस्य शोधविकासपरिषदः च अध्यक्षः (डीन) प्रोफेसर्-रातुलबुजरबरुवा-महोदयः अकरोत्। कार्यक्रमस्य उद्घाटनं कृत्वा विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशी-महोदयः अवदत् यत् आनन्दरामबरुवा-महोदयः 'प्राग्ज्योतिषपुरसम्भवः' इति परिचाययन् गौरवं प्राप्नोति स्म। एकः कुशलः प्रशासनिक-अधिकारी महान् संस्कृतविद्वान् च रूपेण सः चिरस्मरणीयः अस्ति। विश्वविद्यालयस्य कुलशासिका (रेक्टर) समकुलपतिः मल्लिका कलिता महाभागा अपि अस्मिन् व्याख्यानकार्ये उपस्थिता आसीत्।अस्मिन् कार्यक्रमे विशिष्टवक्त्रीरूपेण गुवाहाटी-विश्वविद्यालयस्य संस्कृतविभागस्य सहायिकाचार्या डॉ. बीणिमा बुजरबरुवा महाभागा उपस्थिता आसीत्। प्राच्यविद्यार्णव-आनन्दरामबरुवामहोदयस्य व्यक्तित्वं कृतित्वं च अधिकृत्य सा अवदत् यत् आनन्दरामबरुवामहोदयस्य समसामयिके काले बहूनां यशस्विनाम् उच्चमेधाविनां च जनानाम् आविर्भावेन शिक्षा-साहित्य-संस्कृति-समाजसंस्कार-राजनीति-क्षेत्रेषु सुवर्णयुगस्य आरम्भः अभवत्। अस्मिन् कालखण्डे मनीषीणां मध्ये पण्डितप्रवरः आनन्दरामबरुवा एकस्याः उज्ज्वलप्रतिभायाः रूपेण व्यराजत। सः एकः अविरतः अन्वेषकः, संस्कृतभाषा-साहित्यस्य पुनरुद्धारकार्ये कठोरपरिश्रमं कृतवान् एकः अविस्मरणीयः पुरुषः आसीत्।संस्कृतसाहित्यविभागस्य शोधच्छात्रया ज्योतिस्मितादास-महाभागया सञ्चालिते अस्मिन् कार्यक्रमे धन्यवादार्पणं संस्कृतसाहित्यविभागस्य सहायकाचार्यः डॉ. कमललोचन- आत्रेय-महोदयः अकरोत्।

# हजारीबागनगरे

## पञ्चदशदिवसीयाभाषिक-संस्कृतसम्भाषणशिबिरस्य सम्पूर्तिसत्रम् आयोजितम्




**हिमसंस्कृतवार्ताः:- गौरव दुबे, हजारीबाग।** संस्कृतभारती हजारीबागनगरशाखा पञ्चदशदिवसीयस्य भाषिक- संस्कृत- सम्भाषण-शिबिरस्य समापनसत्रम् आयोजयत्। अस्य कार्यक्रमस्य शुभारम्भं सिजलमिश्रा सरस्वतीवन्दनया स्वागतगीतेन चाकरोत् तथा च प्रवीणो ध्येयमन्त्रं प्रस्तौत्। अस्य कार्यक्रमस्य कुशलमञ्चसञ्चालनं दुबेगौरवोऽकरोत्। अस्यां सम्पूर्तौ मुख्यातिथिः संस्कृतभारत्याः प्रान्तोपाध्यक्षः डॉ. दीपरामचन्द्रकश्यपाभाषत यत् संस्कृतस्य सर्वव्यापकता सर्वत्र वर्तते तथा च सोऽगादत् यत् संस्कृतपठितारः कदाप्यवसादेन ग्रस्ता न भवन्ति योऽवसाद आधुनिककाले मुख्या समस्या वर्तते। मुख्यवक्ता डॉ सुबोधकुमारसाहूः नूतनशिक्षानीतौ संस्कृतस्य महत्त्वपूर्णस्थानस्योल्लेखमकरोत् तथा चाभाषत यत् संस्कृतस्य प्रचारः प्रसारश्च प्रत्येकस्य संस्कृतछात्रस्य शिक्षकस्य च कर्त्तव्यं वर्तते। स प्राचीनकालादारभ्याद्ययावत् संस्कृतभाषायाः स्थितेरुपरि प्रकाशमप्यक्षिपत्।

कार्यक्रमस्य विशिष्टातिथिः डॉ. अवधेशकुमारशर्मा अभाषत यत् संस्कृतभाषापरिष्काराय निरन्तरताया आवश्यकता वर्तते तथा च स सर्वान् छात्रान् न्यवेदयत् यत् ते परस्परं संस्कृतेनैव वार्तालापं कुर्युः। अस्याः सम्भाषणकक्षाया विशिष्टप्रशिक्षकः सन्दीपमिश्रोऽभाषत यज्ज्ञानरूपिभवनस्य कुञ्चिका संस्कृतमेव वर्तते। स संस्कृतं सरलं वा कठिनमिति विषये स्वविचारमस्थापयत्। विशिष्टप्रशिक्षकः प्रवीणकुमारोऽभाषत यदद्य संस्कृतमनिवार्या भाषा वर्तते तथा च विद्यालयेष्वप्यनिवार्यभाषारूपेणास्याः स्थानं वर्तते। विशिष्टप्रशिक्षकः डॉ. मनीषचन्द्रपाण्डेयोऽभाषत यत् संस्कृतं केवलं सम्भाषणे नापि त्वस्माकमाचरणेऽपि भवेत् तथा च संस्कृतस्य प्रचारः प्रसारश्चास्माकं कर्त्तव्यं वर्तते। अस्य शिबिरस्य प्रशिक्षको दुबेगौरवोऽभाषत यद्भाषायामस्माकमधिकारो निरन्तराभ्यासेनैव सम्भवति। अस्मिन् सम्पूर्तिसत्रे विद्यार्थिनः सङ्गीतभाषणप्रभृतीनि अप्रस्तुवन्। आशीषः पीयूषश्चानुभवकथनमप्रस्तुताम् तथा च कोमला गीतमगायत अञ्जली अपि संस्कृतगीतमगायत। शिबिरस्य प्रशिक्षकः डॉ. मिश्ररामसेवकोऽतिथीन् प्रशिक्षकान् छात्रान् च प्रत्याभारं प्राकटयत् तथा च संस्कृतभाषायाः प्रचारप्रसारार्थं निरन्तरप्रयासरतो भवितुं सङ्कल्पमकरोत् तथा च स विश्वासमजनयत् यदग्रेऽप्येतादृश्यः कक्षा भविष्यन्ति। अस्य शिबिरस्य सम्पादने संस्कृतभारती-कार्यकर्तृणामभूतपूर्व- योगदानमासीत्॥